नीरसः, पुं, (निःसृतो रसो यस्मात् ।) दाडिमः । इति हारावली । (निर्नास्ति रसो यत्र ।) रसशून्ये, त्रि । यथा,—
"शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत् ।
स एव चेदशृङ्गारी नीरसं सर्व्वमेव तत् ॥"
इति प्राच्यः ॥

नीराखुः, पुं, (नीरस्य आखुः ।) उद्रः । उद्बिड़ाल इति भाषा ॥ तत्पर्य्यायः । जलनकुलः २ जलविड़ालः ३ जलप्लवः ४ । इति हारावली । ७६ ॥ उद्रः ५ जलाखुः ६ नीरजः ७ नकुलः ८ । इति शब्दरत्नावली ॥

नीराजनं, क्ली, } (राज दीप्तौ + ल्युट् ।
नीराजना, स्त्री, } नितरां राजनं यत्र ॥ निर् + राज् + णिच् + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति भावे युच् ।) वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना । नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा । इत्यमरटीकायां भरतः ॥ * ॥

तद्विधानं यथा,—
"शरत्काले महाष्टम्यां दुर्गायाः परिपूजनम् ।
नीराजनं दशम्यान्तु कुर्य्याद्वै बलवृद्धये ॥
विधिं नीराजनस्य त्वं शृणु पार्थिवसत्तम ! ।
कृतेन येन चाश्वानां गजानामपि चेष्टनम् ॥
आश्विने शुक्लपक्षे या तृतीया स्वातियोगिनी ।
ऐशान्यां स्वपुरस्यैव गृह्णीयात् स्थानमुत्तमम् ॥
नीराजनं ततः कुर्य्यात् संप्राप्ते दिवसेऽष्टमे ।
नीराजनस्य कालस्तु पूर्व्वमुक्तस्तु ते मया ॥
विधानमत्र शृणु मे कृतकृत्यो भविष्यसि ।
एकं हयं महासत्वं सुमनोहरमेव वा ॥
पूजयेत् सप्तदिवसान् गन्धपुष्पादिकांशुभिः ।
तृतीयादौ पूजयित्वा नयेत्तं यज्ञमण्डपम् ॥
चेष्टां निरूपयंस्तस्य जानीयाच्च शुभाशुभम् ।
परराष्ट्रविमर्द्दः स्यादश्वो यदि पलायते ॥
म्रियते राजपुत्रस्तु यदि चाश्रूणि मुञ्चति ।
नीयमानो न गच्छेच्चेन्महिषीमरणं तदा ॥
तथैव मुख्यमात्यविध्वंसं कुर्य्याद्धयो यदि ।
यत्काष्ठाभिमुखः कुर्य्यात्तत्काष्ठायां जयेद्रिपून् ॥
उत्थाप्य दक्षिणाग्रन्तु पदमश्वो भवेत् पुरा ।
तदा जयेत् समस्तांश्च नृपतिर्व्विजयेद्रिपून् ॥
प्रातर्नीराजनं कुर्य्याद्दशम्यां नृपसत्तम ! ।
तदभावे तु द्वादश्यां तस्यामेव समाचरेत् ॥
कार्त्तिके पञ्चदश्यां वा तदभावे तु पार्थिवः ।
ऐशान्यां स्वपुरस्योर्व्वेदंदमानेन षोड़श ॥
दशहस्तान्तु विपुलं कुर्य्याद्वै तत्र तोरणम् ।
द्वात्रिंशद्धस्तमायामन्तु हस्तषोड़शविस्तृतम् ॥
यज्ञार्थं मण्डपं कुर्य्यात् मध्ये वेदिं विनिर्म्मयेत् ।
वेद्याश्चोत्तरतश्चाश्ववेदिं कुर्य्याद्दशुत्तमाम् ॥
यत्र संस्थाप्य चाश्वाश्च पूजितव्याः पुरोहितैः ।
अर्ज्जुनमरशाखानामर्ज्जुनस्याथवा नृपः ॥
मत्स्यशाखाङ्कितैश्चक्रैर्ध्वजैश्चापि विभूषयेत् ।
तोरणं कलशै रत्नैस्तथा नानाविधैर्म्मतैः ॥
भल्लातकं शालिकुष्ठं सिद्धार्थं सैन्धवस्य तु ।
कण्ठदेशे निबध्नीयात् पुष्टिशान्त्यर्थमेव च ॥
वैष्णवं मण्डलं कृत्वा दिक्पालांश्च नवग्रहान् ।
विश्वेदेवांस्तु मन्त्रेण विष्णुमुख्यान् प्रपूजयेत् ॥
आज्यैस्तिलैश्च पुष्पैश्च मिश्रीकृत्य पुरोहितः ।
रवेस्तु वरुणस्यैव प्रजेशस्य तथैव च ॥
पुरुहूतस्य विष्णोश्च होमं सप्ताहमाचरेत् ।
एकैकस्य सहस्रं वा अष्टोत्तरशतञ्च वा ॥
कुर्य्यात्तु प्रत्यहं होमं चतुर्व्वर्गस्य सिद्धये ।
समिधश्चापि होतव्याः पलाशं खदिरं तथा ॥
औडुम्बरञ्च काश्मर्य्यमश्वत्थञ्च पुरोहितः ।
सौवर्णान् राजतान् वापि मार्त्तिकान् वा यथेच्छया ॥
कुर्य्यात्तु कलसानष्टौ फलपल्लवयोजितान् ।
निक्षिपेत्तु घटेष्वेव समङ्गां हरितालकम् ॥
चन्दनञ्च तथा कुष्ठं प्रियङ्गुञ्च मनःशिलाम् ।
अञ्जनञ्च हरिद्राञ्च श्वेतां दन्तीं तथैव च ॥
भल्लातकं पूर्णकोषं सहदेवां शतावरीम् ।
वचां सनागकुसुमां सोमराजीं स्वगुप्तिकाम् ॥
तुत्थञ्च करवीरञ्च तुलसीदलमेव च ।
एतानि निःक्षिपेन्मध्ये कलसानां पुरोहितः ॥
कनकैरजुनैर्व्वापि दारुभिः सुक्स्रुवौ तथा ।
कर्त्तव्यौ शान्तिकामेन नीराजनविधौ नृप ! ॥
एवं सप्ताहपर्य्यन्तं पूजाभिर्हवनैस्तथा ।
पूर्व्वोक्तान् पूजयित्वा तु नृपः सप्ताहमाचरेत् ॥
यावन्नीराजनं कुर्य्यात्तावद्राजा वसेद्गृहे ।
रात्रौ न यज्ञभूमौ तु निवसेच्छान्तिमिच्छुकः ॥
नारोहयेत्तु तुरगं गजं वा तत्र पार्थिवः ।
यावत् सप्ताहपर्य्यन्तं यानेनान्येन वै व्रजेत् ॥
भक्ष्यैर्नानाविधैश्चैव मधुपायसयावकैः ।
मोदकैर्व्वा बलिं कुर्य्याच्चान्नव्यञ्जनसम्भवैः ॥
पूर्व्वोक्तानान्तु देवानां सप्ताहं यावदुत्तमम् ।
सप्तमेऽह्नि तु रेमन्तं पूजयेत्तोरणान्तरे ॥
सूर्य्यपुत्रं महाबाहुं द्विभुजं कवचोज्ज्वलम् ।
ज्वलन्तं शुक्लवस्त्रेण केशाग्रदृग्रथ्य वाससा ॥
कशां वामकरे बिभ्रद्दक्षिणन्तु करं पुनः ।
सखड्गं न्यस्य वल्गायां सितसैन्धवसंस्थितम् ॥
एवंविधन्तु रेमन्तं प्रतिमायां घटेऽपि वा ।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे ॥ * ॥
पूजयित्वा तु रेमन्तं द्विरदं तुरगन्तथा ।
आहताम्बरसंवीतं स्रक्चन्दनसमन्वितम् ॥
सुवर्णाबद्धनिस्त्रिंशं विचित्रकवचादिभिः ।
युक्तन्तु होमकुण्डस्य ऐशान्यामश्ववेदिकाम् ।
पूर्व्वं कृत्वा नयेदश्वगजपालः पृथक् पृथक् ।
नीयमाने गजे चाश्वे पूर्व्वोक्तञ्च निमित्तकम् ।
यत्नादीक्षेत नृपतिः फलं चैवावधारयेत् ।
होमकुण्डस्योत्तरस्यां वेद्यामश्वमेघे स्थित ।
दैवविदा चाश्वविदा सहितो वीक्ष्य सैन्धवम् ।
नीताय तुरगायाशु भक्तपिण्डीं सुगन्धिनीम् ॥
दद्यात् पुरोहितस्तत्र संमन्त्र्य शान्तिमन्त्रकैः ।
तत्पश्चाद्यदि जिघ्रेत्तदश्नीयाद्वा हयः स च ॥
तदा स्यात् सर्व्वकल्याणं विपरीतमतोऽन्यथा ॥
शाखामौडुम्बरीमार्द्रां सकुशाञ्च घटोदके ।
आप्लाव्याप्लाव्य तुरगान् गजान् भूपञ्च सैनिकान् ।
रथांश्च संस्पृशेन्मन्त्रैः शान्तिकैः पौष्टिकैस्तथा ॥
सेचयन् सहितैर्विप्रैश्चतुरङ्गं पुरोहितः ।
दिक्पालानां ग्रहाणाञ्च मन्त्रैश्चैव सवैष्णवैः ॥
बहुधा चाभिषिच्याथ ततः सौवर्णदर्पणम् ।
वीक्षयित्वा नृपश्चर्त्विक् ततो मन्त्रिणमेव च ॥
राजपुत्रांस्तथामात्यानन्यानपि च पौरवान् ।
कथयन् द्विजशार्द्दूलः सर्व्वानेव तु दर्शयेत् ॥ * ॥
चतुरङ्गबलस्यापि कृत्वैवं शान्तिपौष्टिके ।
मृण्मयं शात्रवं कृत्वा ह्यभिचारकमन्त्रकैः ॥
हृदि शूलेन विद्धा तं शिरः खड्गेन छेदयेत् ।
आचार्य्यः कविकां पश्चादभिमन्त्र्य हयाय वै ॥
ऐन्द्रैः प्राभाकरैर्म्मन्त्रैर्दद्याद्धरिं स्वयं पुनः ।
तमनेन तु मन्त्रेण समारुह्य नृपस्तदा ॥
गच्छेदुत्तरपूर्व्वान्तु दिशं सर्व्वबलैर्युतः ।
ऋत्विक्पुरोहिताचार्य्याः सर्व्व एव नृपस्तथा ॥
अनुगच्छेयुरश्वञ्च निमित्तानि यलोकयन् ।
वादित्रघोषैस्तुमुलैरातपत्रैश्च तत्तथा ॥
गच्छेन्नीराजने राजा दारयन्निव मेदिनीम् ।
मणिविद्रुममुक्तादस्वर्णरत्नैरलङ्कृतः ।
क्रोशमात्रं ततो गत्वा पूर्व्वद्वारेण पार्थिवः ॥
स्वपुरं प्रविशेद्विप्रैर्यायात् पुरोहितः ।
तत्र गत्वा दक्षिणान्तु हिरण्यं गां तथा तिलम् ।
दत्वा पश्चाद्द्विजेभ्यस्तु दद्याद्दानानि शक्तितः ॥
एवं नीराजनं कृत्वा बलानाञ्च महीक्षितः ।
प्रेत्येह च स्थितां लक्ष्मीं नृपतिः प्राप्नुयात्तथा ॥
त्वमश्वाऽमृतसंजात सागरोद्भव सैन्धव ।
येन सत्येन वहसे शक्रं तेनेह मां वह ॥
येन सत्येन रेमन्तं येन सत्येन भास्करम् ।
वहसे तेन सत्येन विजयाय वहस्व माम् ॥
आभ्यान्तु नृपमन्त्राभ्यामश्वारोहणमाचरेत् ।
आरुह्याश्वे महिष्यास्तु शुद्धान्ते क्षमयेत्ततः ॥
महिषी च ततो भूपं पर्य्यङ्कोपरिसंस्थितम् ।
दूर्व्वाक्षतैः ससिद्धार्थैः स्त्रीभिः सह समर्चयेत् ॥
कृते तु भूमिपश्चैव तृतीयायां नीराजने ।
मृतकं यदि जायेत तन्न दुष्यति केवलम् ॥
सूतके मृतके वापि पार्थिवस्तु यथा तथा ।
बलं नीराजनं कुर्य्यात्तस्मात्तच्च विशेषतः ॥
सद्यःशौचं भवेद्राज्ञां व्यवहारविलोकने ।
तथा विवाहिते यज्ञे परराष्ट्रविमर्द्दने ।
अयन्ते कथितो राजन्नीराजनक्रमो मया ॥"
इति कालिकापुराणे ८६ अध्यायः ॥ * ॥
(निर् + राज + भावे ल्युट् ।) निर्म्मञ्छनम् । आरति इति भाषा । तत्र पञ्चनीराजनं यथा,
"पञ्चनीराजनं कुर्य्यात् प्रथमं दीपमालया ।
द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् ।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि ॥"
इति कालोत्तरतन्त्रम् ॥
तस्य वर्त्तिकादिप्रमाणं यथा,—
"कुङ्कुमागुरुकर्पूरघृतचन्दननिर्म्मिताः ।
वर्त्तिकाः सप्त वा पञ्च कृत्वा वन्दापनीयकम् ।